# (इष्णुच्प्रत्ययः एकमवलोकनम्।)

## **7**.अपत्रपिष्णुः।

*(डा. वि. आर्. मनोज्, व्याख्याता, श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्ची।)*

"पर्यच्छे सरसि हृतेंऽशुके पयोभिर्लोलाक्षे सुरतगुरा**वपत्रपिष्णोः**।
सुश्रोण्या दलवसनेन वीचिहस्तन्यस्तेन द्रुतमकृताब्जिनीसखीत्वम्।।" इति। (शिशुपालवधम्.8.46.)

परितः स्वच्छे अन्तर्हितवस्त्वतिरोधायके तस्मिन्सरसि अम्बुना स्त्रीपरिधाने स्थानादपसारिते सति नायिका लज्जावती बभूव। न केवलं वस्त्रस्य स्थानभ्रंशेन लज्जावती। अपि तु रमणश्च लोलाक्षः श्रोण्यासक्तदृष्टिः। यतो जलं स्वच्छमित्युक्तम्। अतोऽङ्गलावण्यदर्शनलालसो नायकोऽभूत्। तेन च तस्याः लज्जाधिका। तदुक्तम् अपत्रपिष्णोः इति। तदा सुश्रोण्याः अपत्रपमाणायाः = लज्जावत्याः तस्याः सखीत्वम् द्रुतमकृत। का ? अब्जिनी = नलिनी। कथम् ? वीचिहस्तन्यस्तेन दलवसनेन। वीचिरेव हस्तो वीचिहस्तस्तेन न्यस्तेन = वीचिहस्तन्यस्तेन दलवसनेन = पर्णांशुकेनेति भावः। अत्रापत्रपिष्णोः इत्यस्य लज्जावत्याः इत्यर्थः। 'लज्जा सापत्रपान्यतः' इत्यमरः। 'लज्जाशीलेऽपत्रपिष्णुः' इति च। 'अप'पूर्वकात् 'त्रपूष् लज्जायाम्' (भ्वा.374) इत्यस्मादिष्णुच्। **(7.अपत्रपिष्णुः।)**

## **8**.वर्धिष्णुः।

युधिष्ठिरयागार्थं प्रस्थितस्य सबलस्य श्रीकृष्णस्य रैवतकाद्रेः उपत्यकायां सन्निवेशवर्णनाप्रसङ्गे माघः –

"छायामपास्य महतीमपि वर्तमानामागामिनीं जगृहिरे जनतास्तरूणाम्।
सर्वेऽपि नोपगतमप्यपचीयमानं **वर्धिष्णु**माश्रयमनागतमभ्युपैति।।" इति। (शिशुपालवधम्.5.14.)

तथ्यमिदं यज्जनाः साम्प्रतिकमपास्य आगन्तुकमपेक्षन्ते। तत्रापि वर्तमानं परित्यजन्ति वर्धमानार्थम्। तदुक्तं महामहोपाध्यायेन मल्लिनाथेन 'त्यागस्वीकारयोः क्षयवृद्धिप्रयुक्तत्वादि'ति। तदिदं पद्यमप्येतदेव वक्ति यत् कृष्णस्यानुगन्तारो जनाः तरूणां विद्यमानं महतीमपि छायां त्यक्त्वा आगामिनीं **वर्धिष्णुं** छायां जगृहिरे इति। तथा हि सर्वो जनः प्राप्यमपि क्षीयमाणमाश्रयं न गृह्णाति, किन्त्वप्राप्तमपि **वर्धिष्णुं** = वर्धनशीलमाश्रयमुपैतीत्यर्थः। 'वृधु वृद्धौ' (भ्वा.759) इत्यस्मादिष्णुच्प्रत्ययः। 'स्याद्वर्धिष्णुस्तु वर्धनः' इत्यमरः। एवं –

'......**वर्धिष्णू** परितो रणम्। '......चेरतुः खरदूषणौ ।।" इति। (भट्टिकाव्यम्.5.1.) मायया **वर्धिष्णू** = वर्धनशीलौ खरदूषणौ समरं सर्वतश्चक्रमतुरित्यर्थः। **(8.वर्धिष्णुः।)**